॥ अथ ग्रीष्मः ॥

अच्छाच्छचन्दनरसार्द्रकरा मृगाक्ष्यो
धारागृहाणि कुसुमानि च कौमुदी च ।
मन्दो मरुत्सुमनसः शुचि हर्म्यपृष्ठं
ग्रीष्मे मदं च मदनं च विवर्द्धयन्ति ॥ ३८ ॥

स्रजो हृद्यामोदा व्यजनपवनश्चन्द्रकिरणाः
परागः कासारो मलयजरजः सीधु विशदं ।
शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशो
निदाघात्तूर्णं तत्सुखमुपलभन्ते सुकृतिनः ॥ ३९ ॥

सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरः
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभि ।
स्रजो हृद्यामोदास्तदिदमखिलं रागिणि जने
करोत्यन्तः क्षोभं न तु विषयसंसर्गविमुखे ॥ ४० ॥

॥ इति ग्रीष्मः ॥

॥ अथ वर्षासमयः ॥

तरुणीवेषो दीपितकामा विकसज्जातिः पुष्पसुगन्धिः ।
उन्नतपीनपयोधरभारा प्रावृट् कुरुते कस्य न हर्षं ॥ ४१ ॥

वियदुपचितमेघं भूमयः कन्दलिन्यो
नवकुटजकदम्बामोदिनो गन्धवाहाः ।
शिखिकुलकलकेकारावरम्या वनान्ताः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ४२ ॥

उपरि घनं घनपटलं तिर्यग्गिरयो ऽपि नर्तितमयूराः ।
वसुधा कन्दलधवला दृष्टिं पथिकः क्व पातयतु ॥ ४३ ॥

इतो विद्युद्वल्लीविलसितमितः केतकितरोः
स्फुरद्गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्ते ते विरहदिवसाः संभृतरसाः ॥४४॥

असूचीसंचारे तमसि नभसि प्रौढजलद-
ध्वनिप्राप्ते तस्मिन् पतति दृषदां नीरनिचये ।
इदं सौदामिन्याः कनककमनीयं विलसितं
मुदं च ग्लानिं च प्रथयति पथिष्विव सुदृशां ॥४५॥

आसारेषु न हर्म्यतः प्रियतमैर्यातुं यदा शक्यते
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिंग्यते ।
जाताः शीतलशीकराश्च मरुतो वात्यन्तखेदच्छिदो
धन्यानां वत दुर्दिनं सुदिनतां याति प्रियासंगमे ॥४६॥

॥ इति वर्षासमयः ॥

॥ अथ शरत् ॥

अर्द्धं नीत्वा निशायाः सरभससुरतायासखिन्नश्लथाङ्गः
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।
संभोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो
ज्योत्स्नाभिन्नाधराशं पिवति न सलिलं शारदं मन्दभाग्यः ॥४७॥

॥ अथ हेमन्तः ॥

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोभृतः
काश्मीरद्रवसान्द्रदिग्धवपुषः खिन्ना विचित्रै रतैः ।
पीनोरस्थलकामिनीजनकृताश्लेषा गृहाभ्यान्तरे
ताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥४८॥

॥ अथ शिशिरः ॥

चुम्बन्तो गण्डभित्तीरलकवति मुखे शीत्कृतान्यादधाना
वक्षःसूत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
ऊरूनाकम्पयन्तः पृथुजघनतटात्स्रंसयन्तोंऽशुकानि
व्यक्तं कान्ताजनानां विटचरितकृतः शैशिरा वान्ति वाताः ॥४९॥

केशानाकलयन्दृशो मुकुलयन्वासो बलादाक्षिपन्
आतन्वन्पुलकोद्गमं प्रकटयन्नालिंग्य कम्पं शनैः ।
वारं वारमुदारशीत्कृतकृतो दन्तच्छदान् पीडयन्
प्रायः शैशिर एष सम्प्रति मरुत्कान्तासु कान्तायते ॥५०॥

॥ इति ऋतुवर्णनं ॥

असाराः सन्त्वेते विरतिविरसायासविषया
जुगुप्सन्तां यद्वा ननु सकलदोषास्पदमिति ।
यथाप्यन्तस्तत्त्वे प्रणिहितधियामप्यतिबलम्
तदीयो नाख्येयः स्फुरति हृदये कोऽपि महिमा ॥५१॥

भवन्तो वेदान्तप्रणिहितधियामाप्तगुरवो
विदग्धालापानां वयमपि कवीनामनुचराः ।
तथाप्येतद्भूमौ न हि परहितात्पुण्यमधिकं
न चास्मिन्संसारे कुवलयदृशो रम्यमपरं ॥५२॥

किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापैर्
द्वयमिह पुरुषाणां सर्वदा सेवनीयं ।
अभिनवमदलीलालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥५३॥

सत्यं जना वच्मि न पक्षपाताल्-
लोकेषु सर्वेषु च तथ्यमेतत् ।

नान्यं मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुर्न च कश्चिदन्यः ॥५४॥

॥ अथ दुर्विरक्तप्रशंसा ॥

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषा ताड्यते चपललोचनाञ्चलैः ॥५५॥

वचसि भवति संगत्यागमुद्दिश्य वार्त्ता
श्रुतिमुखरमुखानां केवलं पण्डितानां ।
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं
कुवलयनयनानां को विहातुं समर्थः ॥५६॥

स्वपरप्रतारको ऽसौ निन्दति यो ऽलीकं पण्डितो युवतीः ।
यस्मात्तपसो ऽपि फलं स्वर्गः स्वर्गस्य तथाप्सरसः ॥५७॥

मत्तेभकुम्भदलने भुवि सन्ति शूराः
केचित्प्रचण्डमृगराजबधे ऽपि दक्षाः ।
किं तु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥५८॥

सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥५९॥

उन्मत्तप्रेमसंरम्भादारम्भन्ते यदङ्गनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मा खलु कातरः ॥६०॥

तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकता ।
यावज्ज्वलति नाङ्गेषु स्वतः पञ्चेषु पावकः ॥६१॥

शास्त्रज्ञो ऽपि प्रथितविनयो ऽप्यात्मबोधो ऽपि वाढं
संसारे ऽस्मिन् भवति विरलो भाजनं सद्गतीनां ।
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भवति कुटिला भ्रूलताकुञ्चिकेव ॥ ६२॥

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ।
क्षुधाक्षामो जीर्णः पिठरककपोलार्पितगलः
शुनीमन्वेति श्वा हतमपि निहन्त्येव मदनः ॥ ६३॥

स्त्रीमुद्रां झषकेतनस्य जननीं सर्वार्थसंपत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्या फलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥ ६४॥

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनास्
ते ऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयो दधियुतं भुञ्जन्ति ये मानवास्
तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरं ॥ ६५॥

॥ इति दुर्विरक्तप्रशंसा ॥

॥ अथ स्त्रीणां परित्यागप्रशंसा ॥

संसारे ऽस्मिन्नसारे कुनृपतिभवनद्वारसेवावलम्ब-
व्यासङ्गव्यस्तधैर्यं कथममलधियो मानसं संविदध्युः ।
यद्येताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभागास्तरुण्यः ॥ ६६॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावगाढद्रुमे
गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि ।

कः कुर्वीत शिरःप्रणाममलिनं मानं मनस्वी जनो
यद्यत्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रस्त्रियः ॥ ६७ ॥
संसार तव निस्तारपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ ६८ ॥
॥ इति स्त्रीणां परित्याज्यविधिः ॥
॥ अथ यौवनप्रशंसा ॥
राजन् तृष्णाम्बुराशेर्न हि जगति गतः कश्चिदेवावसानं
को वार्थोऽर्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे ।
गच्छामः सद्म यावद्विकसितकुमुदेन्दीवरालोकिनीनां
आक्रम्याक्रम्य रूपं झटिति न जरया लुप्यते प्रेयसीनां ॥ ६९ ॥
रागस्यागारमेकं नरकशतमहादुःखसंप्राप्तिहेतुर्
मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ।
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं
लोकेऽस्मिन्न ह्यनर्थं निजकुलदहनं यौवनादन्यदस्ति ॥ ७० ॥
शृङ्गारद्रुमनीरदे प्रचुरतक्रीडारसस्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरतामुक्ताफलोदन्वति ।
तन्वीनेत्रचकोरपारणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥ ७१ ॥
॥ इति यौवनप्रशंसा ॥
॥ अथ कामिनीगर्हणं ॥
कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युत्सुकः
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति जानन्नपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितं ॥ ७२ ॥

श्रुता भवति तापाय दृष्टा चोन्मादवर्द्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथं ॥ ७३ ॥
तावदेवामृतमयी यावल्लोचनगोचरा ।
चक्षुःपथादपगता विषादप्यतिरिच्यते ॥ ७४ ॥
नामृतं न विषं किंचिदेकामुक्ता नितम्बिनीं ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ७५ ॥
आवर्त्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां ।
स्वर्गद्वारस्य विघ्नं नरकपुरमुखं सर्वमायाकरण्डं
स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिनां मोहपाशः ॥ ७६ ॥
नो सत्येन शशाङ्क एष वदनीभूतो न चेन्दीवर-
द्वन्द्वे लोचनतां गते न कनकैरप्यङ्गयष्टिः कृता ।
किं त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥ ७७ ॥
लीलावतीनां सहजा विलासास्
त एव मूढस्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्धस्
तत्र भ्रमत्येव मुदा षडंघ्रिः ॥ ७८ ॥
यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृतिवरं
मुखाब्जं तन्वंग्याः किल वसति तत्राधरमधु ।
इदं तावत्पाकद्रुमफलमिवातीव विरसं
व्यतीतेऽस्मिन् काले विषमिव भविष्यत्यसुखदं ॥ ७९ ॥
उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तन-
द्वन्द्वेनोद्यतचक्रवाकमिथुना वक्त्राम्बुजोद्भासिनी ।

कान्ता कारधरा नदीयमभितः क्रूराशया नेष्यते
संसारार्णवमज्जनं यदि ततो दूरेण संत्यज्यतां ॥ ८० ॥
जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषितां ॥ ८१ ॥
मधु तिष्ठति वाचि योषितां
हृदि हालाहलमिव केवलं ।
अत एव निपीयते ऽधरो
हृदयं मुष्टिभिरेव ताड्यते ॥ ८२ ॥
अपसर शवे दूरादस्मात्कटाक्षविशिखानलात्
प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः ।
इतरफणिना दष्टाः शक्याश्चिकित्सितुमौषधैश्
चतुरवनिताभोगग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ ८३ ॥
विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं वडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान् विकृष्य पचतीत्यनुरागवह्नौ ॥ ८४ ॥
कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा संचर मनः पान्थ तत्रास्ते स्मरतस्करः ॥ ८५ ॥
व्यादीर्घेण चलेन वक्रगतिना तेजस्विना भोगिना
नीलाब्जद्युतिनाहिना वरमहं दष्टो न तच्चक्षुषा ।
दृष्टाः सन्ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधं ॥ ८६ ॥
इह हि मधुरगीतं नृत्यमेतद्रसो ऽयं
स्फुरति परिमलो ऽसौ स्पर्श एष स्तनानां ।

इति कृतपरमार्थैरिन्द्रियैर्भ्राम्यमाणो
व्यक्तिकारणदन्तैः पञ्चभिर्वञ्चितो ऽसि ॥ ८७॥
न गम्यो मन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विविधैः शान्तिकशतैः ।
भ्रमावेशादङ्गे किमपि विदधद्भव्यमसमं
स्मरापस्मारो ऽयं भ्रमयति दृशं घूर्णयति च ॥ ८८॥
जात्यन्धाय च दुर्मुखाय च जरज्जीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ ८९॥
वेश्या ऽसौ मदनज्वाला रूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ९०॥
कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।
चारभटचौरचेटकनटविटनिष्ठीवनशरावं ॥ ९१॥

॥ इति कामिनीगर्हणं ॥

॥ अथ सुविरक्तप्रशंसा ॥

धन्यास्त एव तरलायतलोचनानां
तारुण्यपूर्णघनपीनपयोधराणां ।
क्षामोदरोपरिलसत्त्रिवलीलतानां
दृष्ट्वाकृतिं विकृतिमेति मनो न येषां ॥ ९२॥
बाले लीलामुकुलितममी सुन्दरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थ एषः श्रमस्ते ।
संप्रत्यन्ये वयमुपरतं बाल्यमास्थावनान्ते
क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः ॥ ९३॥

इयं बाला मां प्रत्यनवरतमिन्दीवरदल-
प्रभाचौरं चक्षुः क्षिपति किमभिप्रेतमनया ।
गतो मोहो ऽस्माकं स्मरशबरबाणा व्यतिकर-
ज्वरज्वालाः शान्तास्तदपि न वराकी विरमति ॥ १४ ॥
शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रो ज्वला
लक्ष्मीरित्यनुभूयते स्थिरमिव स्फीते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यतां ॥ १५ ॥
सदा योगाभ्यासव्यसनवशयोरात्ममनसोर्
अविच्छिन्ना मैत्री स्फुरति यमिनस्तस्य किमु तैः ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः
सनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ १६ ॥
किं कन्दर्प करं कदर्थयसि किं कोदण्डटङ्कारितै
रे रे कोकिल कोमलैः कलरवैः किं त्वं वृथा वल्गसि ।
मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं
चेतश्चुम्बति चन्द्रचूडचरणध्यानामृते वर्तते ॥ १७ ॥
यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा सर्वं नारीमयमिदमशेषं जगदभूत् ।
इदानीमस्माकं पटुतरविवेकाञ्जनदृशां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ १८ ॥

॥ इति सुविरक्तप्रशंसा ॥

वैराग्ये संचरत्येको नीतौ भ्रमति चापरः ।
शृङ्गारे रमते कश्चिद्भुवि भेदाः परस्परं ॥ १९ ॥

यद्यस्य नास्ति रुचिरं तत्रास्यैव स्पृहा मनोज्ञे ऽपि ।
रमणीये ऽपि सुधांशौ न मनः कामः सरोजिन्याः ॥१००॥
॥ इति भर्तृहरिणा विरचितं शृङ्गारशतकं समाप्तं ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ नीतिशतकं ॥

दिक्कालानवच्छिन्नाय चिन्मात्रानन्तमूर्तये ।
स्वानुभूत्यैकसाराय नमः शान्ताय तेजसे ॥१॥

॥ अथ अज्ञप्रशंसा ॥

यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनो ऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक्तां च तं च मदनं च इमां च मां च ॥२॥
अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥३॥
प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरात्
समुद्रमपि संतरेच्चपलदूर्मिमालाकुलं ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥४॥
लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्

न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ५ ॥
व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणीन् शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षीराम्बुधेरीहते
नेतुं वाञ्छति यः सतां पथि खलान् सूक्तैः सुधास्यन्दिभिः ॥ ६
स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानां ॥ ७ ॥
यदा किंचिज्ज्ञो ऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञो ऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किंचित्किंचिद्बुधजनसकाशादधिगतं
तदा मूर्खो ऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ८ ॥
कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषं ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुतां ॥ ९ ॥
शिरः शार्वं स्वर्गात्पतति शिरसो ऽतः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिं ।
अधोधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टाणां भवति विनिपातः शतमुखः ॥ १० ॥
वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंसर्गः सुरेन्द्रभवनेष्वपि ॥ ११ ॥
॥ इति अज्ञप्रशंसा ॥

॥ अथ विद्वत्प्रशंसा ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्याः प्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षकैर्हि मणयो यैरर्घतः पातिताः ॥ १२॥

हर्तुर्याति न गोचरं किमपि संपुष्णाति यत्सर्वदा-
प्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं परां ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रतिमानमुज्झत नृपाः कस्तैः सह स्पर्द्धते ॥ १३॥

अधिगतपरमार्थान्पण्डितान्मावमंस्थास्
तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलीनां
न भवति बिशतन्तुर्वारणं वारणानां ॥ १४॥

अम्भोजनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
नत्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्धकीर्तिमपहर्तुमसौ समर्थः ॥ १५॥

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
नं स्नानं न विलेपनं कुसुमं नालङ्कृता मूर्द्धजाः ।
वाण्येका समलङ्करोति कृतिनं या संस्कृता धार्यते
क्षीयन्ते ऽखिलभूषणानि सततं वाग्भूषणं भूषणं ॥ १६॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं

विद्या राजसु पूजिता न हि धनं विद्याविहीनः पशुः ॥ १७ ॥
क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलं ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किं ॥ १८ ॥
दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवं ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ १९ ॥
जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसां ॥ २० ॥
जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयं ॥ २१ ॥

॥ इति विद्वत्प्रशंसा ॥

॥ अथ मानशौर्यप्रशंसा ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशां
आपन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केशरी ॥ २२ ॥
स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं

सर्वः कृच्छ्रगतो ऽपि वाञ्छति जनः सत्वानुरूपं फलं ॥२३॥
परिवर्त्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिं ॥२४॥
कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्द्धि वा सर्वलोकस्य विशीर्येत वने ऽथवा ॥२५॥
लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥२६॥
सन्त्यन्ये ऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषास्
तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भासुरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषीकृतः ॥२७॥
वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोधिरनादराद्
अहह महतां निःसीमानश्चरित्रविभूतयः ॥२८॥
वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥२९॥
यदचेतनो ऽपि पादैः स्पृष्टः प्रज्वलति सवितुरतिकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥३०॥
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।

प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥३१॥

॥ इति मानशौर्यप्रशंसा समाप्ता ॥

॥ अथ धनप्रशंसा ॥

जातिर्यातु रसातलं गुणगणास्तस्याप्यधो गच्छतां
शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥३२॥

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥३३॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनाद्
विप्रो ऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयाद्
मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनं ॥३४॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥३५॥

मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरितः श्यामपुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
न निम्नाः शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥३६॥

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णः कलयति धरित्रीं तृणसमां ।
अतश्चानैकान्त्या गुरुलघुतयार्थेषु धनिनां

अवस्था वस्तूनि प्रथयति च संकोचयति च ॥ ३७॥

राजन् दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकमिमं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ३८॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ३९॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
को ऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४०॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थले ऽपि नितरां मेरौ च नातो ऽधिकं ।
त्वं धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलं ॥ ४१॥

॥ इत्यर्थप्रशंसा ॥

॥ अथ दुर्जनप्रशंसा ॥

अकरुणत्वमकारणविग्रहः
परधने च स्पृहा परयोषिति ।
सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनां ॥ ४२॥

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतो ऽपि सन् ।

मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥४३॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्सुगुणिनां यो दुर्जनैर्नाङ्कितः ॥४४॥

लोभश्चास्ति गुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किं ।
सौजन्यं यदि किं जनैः स्वमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥४५॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥४६॥

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजां ।
होतारमपि जुह्वन्तं स्पृष्टो दहति पावकः ॥४७॥

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे स भवति जनो दूरतश्चाप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥४८॥

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषो ऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥४९॥

आरम्भगुर्वी क्षयिणी क्रमेण

लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानां ॥५०॥
मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनां ।
लुब्धकधीवरपिशुना निःकारणवैरिणो जगति ॥५१॥

॥ इति दुर्जनप्रशंसा ॥

॥ अथ सज्जनप्रशंसा ॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयं ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥५२॥
विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनां ॥५३॥
प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं नाप्युपकृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदं ॥५४॥
करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयभुजयोर्वीर्यमतुलं ।
हृदि स्वस्था वृत्तिः श्रुतमधिगतं च श्रवणयोर्
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदं ॥५५॥
सम्पत्सु महतां चित्तं भवत्युत्पलकोमलं ।

आपत्सु च महाशैलशिलासङ्घातकर्कशं ॥ ५६ ॥
संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते ॥ ५७ ॥
प्रीणाति यः सुचरितैः पितरं स पुत्रः
यद्भर्तुरेव हितं इच्छति तत्कलत्रं ।
तन्मित्रं आपदि सुखे च समं प्रयाति
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ५८ ॥
नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः
स्वार्थान्संपादयन्तो विततपृथुतरारम्भयत्नैः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्थनीयाः ॥ ५९ ॥
प्राणीघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषां ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेव पन्थाः ॥ ६० ॥
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गे ऽप्यसुकरं ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदं ॥ ६१ ॥

॥ इति सुजनप्रशंसा ॥

॥ अथ प्रदानप्रशंसा ॥

भवन्ति नम्रास्तरवः फलोद्गमैर्

नवाम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणां ॥ ६२ ॥
श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ॥ ६३ ॥
पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ६४ ॥
पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकाशयति कैरवचक्रवालं ।
नाभ्यर्थितो जलधरो ऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ६५ ॥
एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
ते ऽमी मानुषराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ६६ ॥
क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा ते ऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ ६७ ॥
इतः स्वपिति केशवः कुलमितस्तदीयद्विषां

इतश्च शरणार्थिनः शिखरिपत्रिणः शेरते ।
इतो ऽपि वडवानलः सह समस्तसंवर्तकैर्
अहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ६८ ॥
किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किं त्वङ्गीकृतमुत्सृजन्न मनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतं ॥ ६९ ॥
तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान् मानय विद्विषो ऽप्यनुनय प्रच्छादय स्वान् गुणान्
कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितं ॥ ७० ॥
मनसि वचसि काये पुण्यपीयूषपूर्णास्
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणुं पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ७१ ॥

॥ इति प्रदानप्रशंसा ॥

॥ अथ धैर्यप्रशंसा ॥

रत्नैर्महार्हैस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिं ।
सुधां विना न प्रययुर्विरामं
विनिश्चितार्थाद्विरमन्ति धीराः ॥ ७२ ॥
प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः

प्रारब्धमुत्तमजना न परित्यजन्ति ॥ ७३ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ ७४ ॥

कदर्थितस्यापि हि धैर्यवृत्तेर्
न शक्यते धैर्यगुणः प्रमार्ष्टुं ।
अधोमुखस्यापि कृतस्य वह्नेर्
नाधः शिखा याति कदाचिदेव ॥ ७५ ॥

कान्ताकटाक्षविशिखा न खनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
वर्षन्ति भूरिविषयाश्च न लोभपाशैर्
लोकत्रयं जयति कृत्स्नमिदं स वीरः ॥ ७६ ॥

वरं तुङ्गाच्छृङ्गाद्गुरुशिखरिणः क्वापि पुलिने
पतित्वायं कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीव्रदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ७७ ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणान्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गे ऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ७८ ॥

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कान्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखं ॥ ७९ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो

ज्ञानस्योपशमः शमस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणं ॥ ८० ॥
निन्दन्तु नीतिनिपुणा यदिवा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ८१ ॥

॥ इति धैर्यप्रशंसा ॥

॥ अथ दैवप्रशंसा ॥

भग्नाशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणं ॥ ८२ ॥
पतितो ऽपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायेण साधुवृत्तीनामस्थायिन्यो विपत्तयः ॥ ८३ ॥
छिन्नो ऽपि रोहति तरुः क्षीणो ऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः संतप्यन्ते न ते विपदा ॥ ८४ ॥
नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वाहनः ।
इत्यैश्वर्यबलान्वितो ऽपि बलिभिर्भग्नः परैः सङ्गरे
तव्यक्तं ननु दैवमेव शरणं धिग्धिग् वृथा पौरुषं ॥ ८५ ॥
खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन्देशमनातपं विधिवशाद्विल्वस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः

प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥ ८६॥

गजभुजङ्गमयोरपि बन्धनं
शशिदिवाकरयोर्ग्रहपीडनं ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ ८७॥

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलङ्करणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चेद्
अहह कष्टं अपण्डितता विधेः ॥ ८८॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूको ऽप्यवलोकयते यदि दिवा सूर्यस्य किं दूषणं ।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटे लिखितं तन्मार्जितुं कः क्षमः ॥ ८९॥

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणं ।
सर्वाशापरिपूरिते जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥ ९०॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुं जयत्वाहवे
वाणिज्यं कृषिसेवनादिसकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ ९१॥

॥ इति दैवप्रशंसा ॥

॥ अथ कर्मप्रशंसा ॥

नमस्यामो देवान्न नु हतविधेस्ते ऽपि वशगा

विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किममरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ ९२॥
ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे ।
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ९३॥
नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९४॥
वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुराकृतानि ॥ ९५॥
या साधूंश्च खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विफलेष्वास्थां वृथा मा कृथाः ॥ ९६॥
गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्तेर्
भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ९७॥
स्थाल्यां वैडूर्यमय्यां पचति तिलखलीं चान्दनैरिन्धनौघैः

सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः ।
छित्वा कर्पूरखण्डान् वृतिमिह कुरुते कोद्रवाणां समन्तात्
प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥ ९८ ॥
भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ९९ ॥
लज्जागुणौघजननीं जननीमिव स्वां
अत्यन्तशुद्धहृदयामनुवर्तमानाः ।
तेजस्विनः सुखमसूनपि संत्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञां ॥ १०० ॥
॥ इति श्रीभर्तृहरिणा कृतं नीतिशतकं समाप्तं ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ वैराग्यशतकप्रारम्भः ॥

॥ मङ्गलचरणं ॥

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तः स्फुर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्
चेतः सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

॥ अथ तृष्णादूषणं ॥

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितं ॥२॥
न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ।
महद्भिः पुण्यौघैश्चिरमपि गृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणां ॥३॥
भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मनिरते नाद्यापि संतुष्यसि ॥४॥
उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णाः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटको ऽपि न मया तृष्णे ऽधुना मुञ्च मां ॥५॥
खलोल्लापाः सोढाः कथमपि तदाराधनपरैर्
निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतश्चित्तस्तम्भः प्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे किमु परमतो नर्तयसि मां ॥६॥
अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं म्लानव्रीडैर्निजगुणकथापातकमपि ॥७॥

भोगा न भुक्ता वयमेव भुक्तास्
तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव यातास्
तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ८ ॥

वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ९ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो दुष्टः कायस्तदपि मरणोपायचकितः ॥ १० ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्त्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ ११ ॥

॥ इति तृष्णादूषणं ॥

॥ अथ विषयपरित्यागविडम्बनं ॥

ये सन्तोषसुखप्रमोदमुदितास्तेषां न भिन्ना मुदा
ये त्वन्ये धनलुब्धसङ्कुलधियस्तेषां न तृष्णा हता ।
इत्थं कस्य कृते कृतः स विधिना तादृक् पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ १२ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्तास्त्वेते शमसुखमनन्तं विदधति ॥ १३ ॥

ब्रह्मज्ञानविवेकिनो ऽमलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।
न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययो
वाञ्छामात्रपरिग्रहाण्यपि परित्यक्तुं न शक्ता वयं ॥ १४॥
धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायतां
आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ १५॥
भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रं ।
वस्त्रं च जीर्णशतखण्डमयी च कन्था
हाहा तथापि विषयान्न परित्यजन्ति ॥ १६॥
स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितं ।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्द्धि जघनं
मुहुर्निन्द्यं रूपं कविवरविशेषैर्गुरुकृतं ॥ १७॥
दूरादर्थं घटयति नवं दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति निरतः सत्सभारञ्जनेषु ।
मन्दं मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मल्ली कविरिव सदा विदभैरिरमुक्तः ॥ १८॥
अज्ञानन्माहात्म्यं पतति शलभस्तीव्रदहने
स मीनो ऽप्यज्ञानाद्बडिशयुतमश्नाति पिशितं ।
विजानन्तो ह्येते वयमिह विपज्जालपटलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ १९॥

उदन्वच्छिन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयतां ॥२०॥

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः सम्पदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु संन्यस्यति ॥२१॥

॥ इति विषयपरित्यागविडम्बनं ॥

॥ अथ याञ्चादैन्यदूषणं ॥

दीनादीनमुखैः स्वकीयशिशुकैराकृष्टजीर्णाम्बरां
क्रोशद्भिः क्षुधितैर्निरन्नविधुरां दृश्येत चेद्गेहिनीं ।
याञ्चाभङ्गभयेन गद्गदगलंस्त्रद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥२२॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीविदारकुठारिका
जठरपिठरी दुष्पूरेयं करोति विडम्बनां ॥२३॥

पुण्यग्रामे वने वा महति सितपटच्छन्नपालीकपालीं
आदाय न्यायगर्भं द्विजहुतहुतभुग्धूमधूम्रोपकण्ठं ।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणी स नाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥२४॥

गङ्गातरङ्गकणशीकरशीतलानि
विद्याधराध्युषितचारुशिलातलानि ।

स्थानानि किं हिमवतः प्रलयं गतानि
यत्सावमानपरपिण्डरता मनुष्याः ॥ २५ ॥
किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ताः किं महीजाः सरसफलभृतो वल्कलिन्यश्च शाखाः
वीक्ष्यन्ते किं मुखानि प्रसभमपगतप्रश्रयाणां खलानां
दुःखोपात्ताल्पवित्तस्मयपवनवशान्नर्तितभ्रूलतानि ॥ २६ ॥
पुण्यैर्मूलफलैः प्रियप्रणयिनीं वृत्तिं कुरुष्वाधुना
भूशय्यां नवपल्लवैरकृपणैरुत्तिष्ठ यामो वनं ।
क्षुद्राणामविवेकमूढमनसां तत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ २७ ॥
फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरितां ।
मृदुस्पर्शा शय्या सुललितलता पल्लवमयी
सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥ २८ ॥
ये वर्धन्ते धनपतिपुरः प्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः ।
तेषामन्तः स्फुरितहसितं वासराणां स्मरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ २९ ॥
एको देवः केशवो वा शिवो वा
एकं मित्रं भूपतिर्वा यतिर्वा ।
एको वासः पत्तने वा वने वा
एका भार्या सुन्दरी वा दरी वा ॥ ३० ॥
भिक्षाहारमदैन्यमप्रतिहतं भीतिच्छिदं सर्वदा
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनं ।

सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥३१॥

॥ इति याच्ञादैन्यदूषणं ॥

॥ अथ भोगे ऽस्थैर्यपद्धतिः ॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे तरुण्याभयं ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयं ॥३२॥

आक्रान्तं मरणेन जन्म जरसा यात्युत्तमं यौवनं
सन्तोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैर्
अस्थैर्येण विभूतयो ऽप्युपहता ग्रस्तं न किं केन वा ॥३३॥

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव प्रापदः ।
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्
तत्किं केन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरं ॥३४॥

भोगास्तुङ्गतरङ्गभङ्गचपलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं स्फुर्तिक्रियासु स्थितं ।
तत्संसारमसारमेव निखिलं बुधा बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयतां ॥३५॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरं ।
लीला यौवनलालसास्तनुभृता मिथ्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥३६॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीर्
अर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरं तु ॥३७॥
कृच्छ्रेणामिध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः ।
वामाक्षीणामवज्ञा विहसितवसतिर्वृद्धभावोऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमस्ति किंचित् ॥३८॥
व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहे ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रं ॥३९॥
भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवस्
तत्कस्येह कृते परिभ्रमत हे लोकाः कृतं चेष्टितं ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
काम्योत्पत्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥४०॥
ब्रह्मेन्द्रादिमरुद्गणांस्तृणगणान् यत्र स्थितो मन्यते
यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ।
बोधः को ऽपि स एक एव परमो नित्योदितो जृम्भते
भोः साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥४१॥

॥ इति भोगदूषणं ॥

॥ अथ कालमहिमा ॥

सा रम्या नगरी महान्स नृपतिः सामन्तचक्रं च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।

उन्मत्तः स च राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः
सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः ॥ ४२ ॥
यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनुबहवस्तत्र नैको ऽपि चान्ते ।
इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ
कालः काल्या भुवनफलके क्रीडति प्राणिशारैः ॥ ४३ ॥
आदित्यस्य गतागतैरहरहः संक्षीयते जीवनं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्म जराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ४४ ॥
रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृताः प्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तमुक्तविषयैरित्थं विधिनामुना
संसारेण कदर्थिता वयमहो मोहं न लज्जामहे ॥ ४५ ॥
न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मो ऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्ने ऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयं ॥ ४६ ॥
नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदमनैर्नाकं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥ ४७ ॥
विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषा ऽपि समाहितेन मनसा पित्रोर्न संपादिता ।

आलोलायतलोचना युवतयः स्वप्ने ऽपि नालिङ्गिताः
कालो ऽयं परपिण्डलोलुपतया काकैरिवापोषितः ॥४८॥

वयं येभ्यो जाताश्चिरपरिगता एव खलु ते
समा येषां वृद्धाः स्मृतिविषयतां ते ऽपि गमिताः ।
इदानीमेते स्म प्रतिदिवसमापन्नपतना
गताः तुल्यावस्थां सिकतिनि नदीतीरतरुभिः ॥४९॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं गतं
तस्यार्द्धस्य परस्य चार्द्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनां ॥५०॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुर्
नरः संसारान्ते विशति यमधानीयवनिकां ॥५१॥

॥ इति कालमहिमा ॥

॥ अथ यतिनृपतिसंवादः ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखो ऽसि वयमप्येकान्ततो निस्पृहाः ॥५२॥

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं
शूरस्त्वं वादिदर्पज्वरशमनविधावक्षयं पाटवं नः ।
सेवन्ते त्वां धनाढ्या मतिमलहृतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन् गतासीत् ॥५३॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे को ऽर्थवान् को दरिद्रः ॥५४॥
फलमलमशनाय स्वादु पानाय तोयं
शयनमवनिपृष्ठे वाससी वल्कले च ।
धनलवमधुपानभ्रान्तसर्वेन्द्रियाणां
अविनयमनुमन्तुं नोत्सहे दुर्जनानां ॥५५॥
अश्नीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥५६॥
न नटा न विटा न गायका
न च सभ्येतरवादिचञ्चवः ।
नृप संसदि ते ऽत्र के वयं
स्तनभारानमिता न योषितः ॥५७॥
विपुलहृदयैरीशैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरः स्वाम्ये पुंसां क एष मदज्वरः ॥५८॥
अभुक्तायां यस्यां क्षणमपि न यातं नृपशतैर्
भुवस्तस्या लाभे क इह बहुमानः क्षितिभृतां ।
तदंशस्याप्यंशे तदवयवलेशे ऽपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदं ॥५९॥
मृत्पिण्डो जलरेखया वलयितः सर्वो ऽप्ययं नन्वणुः
स्वांशीः कृत्य तमेव संयुगशते राज्ञां गणा भुञ्जते ।

दृश्यन्ते दद्तो ऽथवा किमपरे नुद्रा दरिद्रा भृशं
धिग्धिक्कापुरुषाधमान्धनलवं तेभ्यो ऽपि वाञ्छन्ति ये ॥ ६० ॥
स जातः को ऽप्यासीन्मदनरिपुणा मूर्द्धि धवलं
कपालं यस्योच्चैर्विनिहितमलङ्कारविधये ।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ ६१ ॥
॥ इति यतिनृपतिसंवादः ॥
॥ अथ मनःसम्बोधनं ॥
परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशविफलं ।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगुणे
विविक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते ॥ ६२ ॥
परिभ्रमसि किं वृथा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद्यथा भवति नान्यथा तत्तथा ।
अतीतमपि न स्मरन्नपि च भाव्यसंकल्पयन्
न तर्कितगमागमाननुभवस्व भोगानिह ॥ ६३ ॥
एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।
आत्मीभावमुपैहि संत्यज निजां कल्लोललोलां गतिं
मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ६४ ॥
मोहं मार्जयतामुपाश्रय रतिं चन्द्रार्द्धचूडामणौ
चेतः स्वर्गतरङ्गिणीतटभुवि व्यासङ्गमङ्गीकुरु ।
को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च स्त्रीषु च
ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः ॥ ६५ ॥

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया
भूपालभ्रुकुटीकुटीरविहरद्व्यापारपण्याङ्गनां ।
कन्थाकञ्चुकितः प्रविश्य भवनद्वाराणि वाराणसी-
रथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ ६६॥

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनां ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६७॥

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
न्यस्तं पदं शिरसि विद्विषतां ततः किं ।
संपादिताः प्रणयिनो विभवास्ततः किं
कल्पस्थितास्तनुभृतस्तनवस्ततः किं ॥ ६८॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थं
स्नेहो न बन्धुषु च मन्मथजा विकाराः ।
संसर्गदोषरहिता विजना वनान्ता
वैराग्यमस्ति किमतः परमर्थनीयं ॥ ६९॥

तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥ ७०॥

पातालमाविशसि यासि नभो विलंघ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ।
भ्रान्त्यापि जातु विमलं कथमात्मलीनं

न ब्रह्म संस्मरसि निर्वृतिमेषि केन ॥ ७१ ॥

॥ इति मनःसम्बोधनं ॥

॥ अथ नित्यानित्यविचारः ॥

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।
मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं शेषा वणिग्वृत्तयः ॥ ७२ ॥
यन्नागा मदभिन्नगण्डकरटास्तिष्ठन्ति निद्रालसा
द्वारि हेमविभूषणाश्च तुरगा वल्गन्ति यद्दर्पिताः ।
वीणावेणुमृदङ्गशङ्खपटहैः सुप्तस्तु यद्बोध्यते
तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितं ॥ ७३ ॥
गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावली
दृष्टिर्नश्यति वर्द्धते बधिरता वक्त्रं च लालायते ।
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रो ऽप्यमित्रायते ॥ ७४ ॥
वर्णं सितं शिरसि वीक्ष्य शिरोरुहाणां
स्थानं जरापरिभवस्य तदेव पुंसां ।
आरोपितास्थिकलशं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ७५ ॥
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ७६ ॥
तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं

गुणोदारान् दारानुत परिचरामः सविनयान् ।
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान्
न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ७७ ॥
दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो
वयं च स्थूलेच्छाः सुमहति पदे बद्धमनसः ।
जरा देहं मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषामत्र तपसः ॥ ७८ ॥
माने ऽम्लायिनि खण्डिते च वसुनि व्यर्थे प्रयाते ऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः
पूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे निवासः क्वचित् ॥ ७९ ॥
रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसमासमागमसुखं काव्येषु रम्याः कथाः ।
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामुपगतं चित्ते न किंचित्पुनः ॥ ८० ॥
रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये ।
किं तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सततं सन्तो वनान्तं गताः ॥ ८१ ॥

॥ इति नित्यानित्यविचारः ॥

॥ अथ शिवार्चनपद्धतिः ॥

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृग्
नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा ।
यो ऽयं धत्ते विषयकरिणीगाढगूढाभिमानः

जीवस्यान्तःकरणकरिणः संयमालानलीलां ॥ ८२॥

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं
हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ।
किं युक्तं सहसाभ्युपैति बलवान् कालः कृतान्तो ऽक्षमी
ह्यज्ञातं मदनान्तकांघ्रियुगलं मुक्त्वास्तु नान्या गतिः ॥ ८३॥

महेश्वरे वा जगतामधीश्वरे
जनार्द्दने वा जगदन्तरात्मनि ।
न वस्तुतो मे प्रतिपत्तिरस्ति
तथापि भक्तिस्तरुणेन्दुशेखरे ॥ ८४॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।
भवाभोगोद्विग्नाः शिवशिवशिवेत्युच्चवचसः
कदा यास्यामो ऽन्तर्गतबहुलवाष्पाकुलदृशः ॥ ८५॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयास्
तरन्तः संसारं विरसपरिणामावधिगतं ।
कदा पुण्यारण्ये परिगतशरच्चन्द्रकिरणास्
त्रियामा नेष्यामो हरचरणचित्तैकशरणाः ॥ ८६॥

कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानो ऽञ्जलिपुटं ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ८७॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावशय्यानिषण्णः ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे

दुःखं मोक्ष्ये कदाहं समकरचरणो पुंसि सेवासमुत्थं ॥ ८८॥

मह्रीशय्या शय्या विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलो ऽयमनिलः।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः
सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ ८९॥

एकाकी निस्पृहः शान्तः पाणिपात्रो दिगम्बरः।
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ९०॥

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण संतुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यतां।
अत्यागे ऽपि तनोरखण्डपरमानन्दावबोधस्पृहां
मर्त्यः को ऽपि शिवप्रसादसुलभीं संपत्स्यति योगिनां ॥ ९१॥

॥ इति शिवार्चनपद्धतिः ॥

॥ अथ अवधूतचर्या ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी
नैश्चिन्त्यं निरपेक्ष्यभैक्ष्यमशनं निद्रा श्मशाने वने।
स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा
स्थैर्यं योगमहोत्सवे ऽपि च यदि त्रैलोक्यराज्येन किं ॥ ९२॥

भूः पर्यङ्को निजभुजलता कन्दुकं खं वितानं
दीपश्चन्द्रो विरतिवनितालब्धसङ्गप्रमोदः।
दिक्कान्ताभिः पवनचमरैर्वीज्यमानः समन्तात्
भिक्षुः शेते नृप इव भुवि त्यक्तसर्वस्पृहो ऽपि ॥ ९३॥

ब्रह्माण्डो मण्डलीमात्रं को लोभो ऽयं मनस्विनः।
शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ ९४॥

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा

स्नानादानविभिन्नवर्णरहितः कश्चित्तपस्वी स्थितः ।
रथ्याकीर्णविशीर्णजीर्णवसनैरस्यूतकन्थाधरो
निर्माणो निरहङ्कृतिः शमसुधाभोगैकबद्धस्पृहः ॥ ९५ ॥
मातर्मेदिनि तात मारुत सखे ज्योतिः स्वबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामग्रे प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ ९६ ॥
स्वादिष्ठं मधुनो घृताच्च रसवद्यत्प्रस्रवत्यक्षरं
दैवीवागमृतात्मनो रसवतस्तेनैव तृप्ता वयं ।
कुक्षी यावदिमे भवन्ति धृतये भिक्षाहृताः शक्तवस्
तावद्दास्यकृतार्जनैर्न हि धनैर्वृत्तिं समीहामहे ॥ ९७ ॥
हिंसाशून्यमयत्नलभ्यमशनं वायुः कृतो वेधसा
व्यालानां पशवस्तृणाङ्कुरभुजः पुष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सहसा सर्वे समाप्तिं गुणाः ॥ ९८ ॥
ददति ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदाने ऽसमर्थाः ।
जगति विदितमेतद्दीयते विद्यमानं
न हि शशकविषाणं को ऽपि कस्मै ददाति ॥ ९९ ॥
पुरा विद्वत्तासीदमलिनधियां क्लेशहतये
गता कालेनासौ विषयसुखसिद्धौ विषयिणां ।
इदानीं संप्रेक्ष्य क्षितितलभुजः शास्त्रविमुखान्
अहो कष्टं सापि प्रतिदिनमधोधः प्रविशति ॥ १०० ॥
॥ इति भर्तृहरिणा कृतं वैराग्यशतकं समाप्तं ॥

एतानि भर्तृहरिणा विरचितानि पद्यानि पुस्तकेषु विविधेषु संचितानि ॥

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधं ॥१॥
साहित्यसंगीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्
तद्भागधेयं परमं पशूनां ॥२॥
एषां न विद्या न तपो न दानं
ज्ञानं च शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भवभारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥३॥
सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः ।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपहारिणि सति हरौ संप्राप्यते देहिना ॥४॥
तानीन्द्रियाणि सकलानि तदेव कर्म
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
त्वन्यक्षणे न भवतीति विचित्रमेतत् ॥५॥

त्वमेव चातको धारा इति लोचनगोचराः ।
किमस्मदम्भोदवरं कार्पण्योक्तिः प्रतीक्ष्यसे ॥ ६ ॥
रे रे चातक सावधानमनसा मित्रं क्षणं श्रूयतां
अम्भोदा बहवो हि सन्ति गगने सर्वे ऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ७ ॥
किं तेन हेमगिरिणा रजताद्रिणा वा
यत्राश्रिताश्च तरवस्तरवस्त एव ।
मन्यामहे मलयमेव यदाश्रयेण
कं कोलनिम्बकुटजान्यपि चन्दनानि ॥ ८ ॥
कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ९ ॥
को लाभो गुणिसङ्गमः किमसुखं प्राज्ञेतरैः सङ्गतिः
का हानिः समये च्युतिर्निपुणता का धर्मतत्त्वे रतिः ।
कः शूरो विजितेन्द्रियः प्रियतमा कानुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलं ॥ १० ॥
अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ ११ ॥
एकेनापि हि शूरेण पादाक्रान्तं महीतलं ।
क्रियते भास्करेणेव स्फारं स्फुरिततेजसा ॥ १२ ॥
रक्तत्वं कमलानां सत्पुरुषाणां परोपकारित्वं ।
असतां च निर्दयत्वं स्वभावसिद्धं त्रिषु त्रितयं ॥ १३ ॥
प्रायः कन्दुकपातेन पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ १४ ॥

अग्राह्यं हृदयं तथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतदुर्गमार्गविषमः स्त्रीणां न विज्ञायते ।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्द्धिता ॥१५॥
इयत्येतस्मिन् वा निरवधि च मत्कृत्यतिशये
वराहो वा शेषः प्रभव नघु मत्कारविषयः ।
मही मिको मग्नां यदयमवहद्धत्तसलिलैः
शिरो राहुः शम्भुर्निगलति परं संत्यजति च ॥१६॥
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे
विरम विरमायासादस्माद्दुराध्यवसायतः ।
अपि जलनिधिः कल्पापाये व्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैतेन वा जलराशयः ॥१७॥
स्पृहयति भुजयोरन्तरमायतकरवालकररुहविदीर्णं ।
विजयं श्रीर्वीराणां व्युत्पन्नप्रौढवनितेव ॥१८॥
अभिमुखनिहतस्य सतस्तिष्ठतु तावज्जयो ऽथवा स्वर्गः ।
उभयबलसाधुवादः श्रवणसुखस्यैव तात्पर्यं ॥१९॥
को न याति वशं लोको मुखे पिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिं ॥२०॥
यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातं ।
अवकरनिकरं विकिरति तत्किं कृकवाकुरिव हंसः ॥२१॥
परिचरितव्याः सन्तो यद्यपि कथयन्ति वा सदुपदेशं ।
यास्त्वेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥२२॥
कमठकुलाचलदिग्गजफणिपतिविधृतापि चलति वसुधेयं ।
प्रतिपन्नममलमनसां न चलति पुंसां युगान्ते ऽपि ॥२३॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित्पुण्ये ऽरण्ये शिव शिव शिवेति प्रलपतः ॥२४॥
धन्यास्ते वीतरागा गुरुचरणरताः त्यक्तसंसारसङ्गास्
ब्रह्मज्ञाने विलीना गिरिवरगहने यौवनं ये नयन्ते ।
ये ऽपि प्रोत्तुङ्गपीनस्तनकलशभरक्लान्तकायां दिनान्ते
कान्तामालिंग्य गाढं मृदुशयनतले शेरते ते ऽपि धन्याः ॥२५॥

॥ इति सर्वाणि भर्तृहरिणा कृतानि पद्यानि समाप्तानि ॥

CHAURI CARMINIS

ET

BHARTRIHARIS SENTENTIARUM

INTERPRETATIO LATINA.

CHAURAPANCHASICAE CARMINIS INTERPRETATIO.

1. Vel hodie virginem illam, veluti aurei Champaki fibram flavam, expansae Nymphaeae ore ridentem, tenerrimis capillis ornatam, e somno surrectam, membris amore concussis languidam, cogito tanquam scientiam incuria amissam.

2. Equidem nunc quoque membris meis suaviter contremisco, quando illam denuo adspicio lunifaciem, nova iuventute insignem, turgentibus papillis et summa pulchritudine gaudentem; cuius corpus per ignem ex Amoris telis enatum vexatur.

3. Vel nunc, quando illam, cuius oculi lotorum magnitudinem referunt, quaeque tumidarum papillarum onere lassata incedit, intueor; lacertis eam comprimendo os ipsius ebibo insaniens, quemadmodum apis nymphaeam pro lubitu osculatur.

4. Illius hodie sum memor ex Veneris colluctatione latera pandentis, cuius pendulae capillorum antiae in pallidulis fluctuabantur genis dum, furtivam culpam intus quasi occultans, blandos lacerti palmites cervicibus coniunxit.

5. Iam in mentem venit illa, quae vultum inflectens, tremulam magni oculi stellam, ex insomnia propter gaudium languidam, circumvolvit; quae matutino tempore faciem prae pudore inclinavit, regio comparanda cygno, dum ex amoris lacu, lotis ornato, progreditur.

6. Equidem denuo intueri si liceret illam, cuius lumina ad aurem usque sunt protensa, cuiusque corpus tenerrimum propter diuturnam absentiam febrit, lacertis firmiter illam amplectens neque oculos deflecterem neque relinquerem illam.

7. Hodieque illam cogito amoris saltationis choragam, plenam lunam pulchrâ facie referentem, prae voluptate membra agitantem, teneram, magnis coxis atque uberibus oneratam, fluctuante capillorum copia ornatam.

8. Illius iam memini, cuius in lectulo iacentis odor ex moschi, cum leni santali pulvere permixti, unctione undique dispergebatur et cui oculi erant venusti, veluti perdicum pari, sese invicem rostro osculantium.

9. Illam hodie cogito in voluptate perfruenda ex vini potu rubicundam, gratiose se moventem, corpore delicatam, mobilibus longisque praeditam ocellis; membra quae tinxerat croco, santalo et moscho atque os camphoraceo succo et betele impleverat.

10. Hodie in mentem venit amicae facies, croceo fuco adornata et sudoris tunc guttulis adspersa; luminibus ex amoris lassitudine tremebundis veluti lunae orbis quando draconis sese expedivit vinculis.

11. Hodie menti obversatur meae illa valedictio, quam quidem illa nocte, qua prae ira discessi, regis filiae pulchricomae in aurem susurravi, annuli aurei loco: vivas bene, faustum precatus.

12. Cogito iam illam amicae faciem, aureis elenchis in utraque gena insignitam, quae in complexu contrario ex agitationis impetu crebris clarisque aquae guttis, veluti margaritis erat conspersa.

13. Recordor quoque ipsius obliquum illum, ex amore enatum adspectum et membrorum inter voluptatis gaudia tremorem; recordor pulchras mammarum papillas post detractam vestis oram conspicuas, et dentium tegumentum, morsiuncularum vestigiis ornatum.

14. Illam hodie cogito formosam, gratiose veluti cygnum incedentem, cuius manus rubicundae erant novae Asoci gemmae instar; cuius uberum papillas margaritarum sertum osculabatur et cuius pallidae genae ex interno risu suaviter efflorescebant.

15. Iam nunc in mentem veniunt signa illa, ex unguium fissuris in illius latis coxis, aurato santalo uberrime ornatis, conspicua et splen-

dida ipsius vestis, auro fimbriata, quam quum exsurgeret et exinde abire vellet, prae verecundia manu tenebat.

16. Ipsam hodie solus cogito, oculis ex consperso collyrio pulchram, cuius multa coma expansis largiter floribus condecorata erat; quae dentibus, minio tincto margaritarum serto similibus, splenduit et aureis armillis ornata.

17. Iam absentis memini, copiosas vittâ solutae comas; cui corollae deciderant cuiusque labia tanquam nectar dulce ridebant; puellae oculis languidae, cuius venustum, magnum ac tumens mammarum par margaritarum linea osculabatur.

18. Illam recordor in candido palatio habitantem, ubi tenebrae expellebantur per clathros lampadum radiantes, in series veluti gemmas splendentes dispositarum; illam quae clanculum dixit: somnus mihi iam est! quum averso vultu et confusis prae pudore ac metu oculis exsurgeret.

19. Illius hodie memini corpus per separationis ignem cruciatae, pudibundae, hinnulei oculis praeditae, unicum suavitatis vasculum praebentis, variegatis omnimodo ornamentis condecoratae, flamingonis instar incedentis illius, pulchris insignitae dentibus.

20. Amatam hodie cogito florigeri telis sauciam illam, propter omnium membrorum venustatem in campo pulchrarum virginum saltatorio primam atque agmen ducentem; quae suavissimum quasi poculum erat dulcedinis ex ludo amatorio hauriendae.

21. Ne momentum quidem obliviscor puellae vitâ mihi carioris, quae corpore lassata incessit ac si vestimento impedita fuerit madido; cuius membra potentissimi Amoris igne adusta; virginis illius nullo marito custoditae, benevolae.

22. Iam vero in mentem si revoco illam regis filiam, quae inter mulieres formosas tanquam unicum amoris receptaculum antea fuit creata: eheu Brahmâ, illa tenerae puellae separatio sustineri a me non potest!

23. Hodie recordor suave ridentem, pectoris onere inclinatam, margari-

tarum copia in collo candide splendentem; amicam illam quae pulchrum Amoris templum ingressa, eximium quasi signiferum Amorem repraesentat.

24. Hodieque in mentem venit illius, ex voluptatis languore confusae, sermo centum facetiis iucundus modo et lascivienti conveniens, modo obscuris sonis et oratione titubante, syllabis confundendis delectabilis.

25. Iam vel in gaudiis vel in vitae termino illam recordor, oculis ex voluptatis insomnia nictitantem, in cuius pulchras tenerasque cervices calantica una cum cincinnis ceciderat; quae regio cygno ex voluptuario lotorum lacu progredienti videbatur similis.

26. Nunc quoque in diei fine, quando illam denuo adspicio amabilem, hinnulei pulli oculis ornatam et nectare impletum papillarum vasculum possidentem: tunc equidem neque coelum curo, neque regiam felicitatem.

27. Iam vero mens mea, Deos postponens, admirabili puellae vi quasi adhaeret: quid ego faciam? quamvis scio mortem omni momento hic mihi imminere, tamen o sapientes, mea amata est et mea pulcherrima.

28. Hodie cogito amicam, quum timidi instar hinnulei vacillantibus oculis, auditâ illa per populum prolata fama, ad me veniret et tremulae deciderent ex oculis confusis lacrimae, ob nimium dolorem faciem deflectens.

29. Illius memini, in cuius vel per momentum separatione venenum quasi est; quae vero mecum coniuncta nectare omnimodo imbuta est; quae, ex amore lassata, dentibns pulchra, natale solum mihi praebet: quid mihi cum Brahmane, Vishnu et Sivo?

30. Nunquam antea mihi, etsi dextre oculis inquirenti, in mundo, mulierum generibus abundante, visum fuit os tali pulchritudine instructum, quam illud in amicae facie, venustate Amorem et lunam devincente.

31. Quid vero ab illa omnibus modis factum sit mea causa, quum ex

regis palatio per satellites abducerer crudeles, terribiles et Yami servis similes, hoc nec dici a me potest et animum meum excruciat.

32. Hoc sane noctu dieque cor meum angit, quod amicae meae faciem ut plenam lunam venustam, suavitate Amorem superantem et Cupidinis vulneribus superbientem, ne momentum quidem amplius coram videre mihi liceat.

33. Nunc quoque, licet etiam in alteram vitam mihi sit eundum, agitata mente cogito virginem illam illaesam, meae vitae spem; cuius eximiae iuventutis pulchritudine nullus fruebatur alius.

34. Hodieque illud, genarum par, quod oberrans apium examen in oris ceu Nymphaeae fragrantiam cupidum, osculatur et strepitus armillarum, brachiorum surculis cum gracilitate motis, valde conturbat animum meum.

35. Iam nunc memini quomodo illa, inter multam gaudii horripilationem, omni studio vigilaret, sibi caveret et me adspiceret, quum ego, ex mellito faciei potu ebrius, unguium fissuras pectoris orbiculo infigerem.

36. Mihi in mentem venit tempus ubi illa, vultu ex ira abalienato et abire cupiens, ad ea quae modo dixeram nihil responderet; ubi oscularer et illa vehementer fleret; ubi ad pedes ipsi prostratus dicerem: servus tibi sum o amata, ama me!

37. Hodie mens mea vagatur, quid ego faciam? Cur omnino mihi tempus abeat cum amicis in domicilio pulcherrimo, per lusos admodum iucundo, ubi puellarum cantus, ioci et variae saltationes instituebantur?

38. Iam vero nescio num haec Sivi uxor sit, an Indri Urvasî, an Krishni Lakshmîs; an vero per creatorem ad trimundi confusionem vel ex cupidine talem virginum margaritam videndi creata sit.

39. Neque sane quisquam in terra illam meam, a nemine tactam, sponsam potest describere: ille solum qui formam in geminis viderit similibus depingere forsan possit, non autem alius.

40. Illam hodie recordor virginem valde iratam, lacrimas, quae cum oculorum collyrio permistae ad aurem usque defluebant, fundentem; plenis rotundisque papillis et reliquis ornatam, fuscam, multarum virtutum decore splendidam.

41. Iam vero illud os, quod aureo colore ut pura auctumnalis luna splendet et vel sancti viri mentem rapiat, nedum meam! quodsi hoc, nectari simile, assequi possem, oscula sane infigerem denuo nec separatio angeret animum meum.

42. Hodie illius memini oris, ut Nymphaeae pollinis suaveolentis, amoris aquam praebentis, Cupidinis ardorem exstinguentis: quodsi hoc unicum gaudii lavacrum denuo assequar, vitam sane relinquam illud obtinendi causa.

43. Iam animum meum consternatum reddit, quod eheu, inter alias mulieres talem formam non mihi licet depingere, in orbe terrarum, virginum genere abundante, ubi eximiarum vicissim invenitur virtutum culmen.

44. Ad mentem meam, Nymphaeae in separationis vado fluctuanti similem, paullatim revenit amabilis illa Phoenicoptera, turgentibus ex prima iuventute membris, quae tenera corporis forma delicatam ac tremulam gaudii undam depingit.

45. Hodie illam cogito optimi regis filiam, lasciva ob perfectae iuventutis ebrietatem lumina iactantem; quae filia potius videbatur regis Gandharvorum, Yakshorum, Deorum ac Kinnarorum ex coelo in conspectum delapsa.

46. Neque noctu dieve obliviscor virginis e somno surgentis, benignae, cuius statura gracilis columnae instar tenera; cuius tumida papillarum vasa nectare erant impleta et quae corpus suum variis decoraverat ornamentis.

47. Hodieque recordor formosam, membris, auri splendore nitentibus, languidam et amoris metu tremebundam; quae tamen per osculationem confusa ad corporum complexum rapiebatur et vitae meae veluti medicamen fuit.